LIBRARY
UNIVERSITY
PENNSYLVANIA

॥श्रीगणेशायनमः॥सुमुखश्चैकदंतश्चेत्यादि० पूर्वोक्तएवंगुणविशेषण
विशिष्टायांपुण्यतिथौअस्ययजमानस्यसकलकुटुंबानांक्षेमस्थिरायु
रारोग्यैश्वर्याभिवृध्यर्थंसमस्तदुरितोपशांत्यर्थंसमस्तमंगलावाप्त्यर्थं
समस्ताभ्युदयार्थंचइप्सितकामनासिध्यर्थंवांछितमनोरथपरिपूर्णार्थंश्री
रामनवमीजन्मंतीपूजनमहंकरिष्ये॥श्रीरामंमनसाचिंत्यमातुरंकगतंह
रिं॥कोमलांगंविशालाक्षंइंदीवरसमप्रभं॥दक्षिणांगेदशरथंपुत्रान्वेष
णतत्परं॥एवंतोलक्ष्मणंदेवंसछत्रंकनकोद्वरं॥पार्श्वेभरतशत्रुघ्नौता
लवृंतकरावुभौ॥अग्रेतुमंतरामानुग्रहांक्षिणं॥वित्तशाठ्यंत्यक्त्वैव
मर्चिंकुर्यात्समत्सरः॥हेमनंस्वर्णमयीकृत्वासीतासहितांसुधां॥प्राण
प्रतिष्ठांकुर्वीतपूर्वोक्तंकृत्वायथाविधि॥शंखंचपूजयेदग्रेततःपूजांसमा
रभेत्॥तत्रशंखोदकेनैवआत्मानंप्रोक्षयेत्ततः॥प्रोक्षयेत्पूजाद्रव्याणि

रामंत्रेणाधीमता॥मंडलंकारयेत्तत्रकलशंचन्यसेत्ततः॥पात्रंवेणुरंध्रंषट्कोणं
तत्रकारयेत्॥स्थापयेदासनंतत्रविचित्रंवस्त्रनिर्मितं॥तस्योपरिन्यसेद्देवपूजांचे
वंततः परं॥ॐनमोभगवतेदशरथात्मजायसर्वात्मनेसंयोगपद्मिनीपीठायत्र
यवाग्रषट्दलंवाषट्कोणंलिखित्वासुवर्णमंडपंकल्पयित्वा।कदलीमपकुर्या
त्॥श्रीरामायनमः॥रामंकमलपत्राक्षंघननीलंसुधाकरं॥सूर्यकोटिप्रतीका
शंवामांगेजानकीयुतं॥परात्परतरंशांतंध्यायेत्संसारतारणं॥इतिध्यानमंत्रः
॥आगच्छरामचंद्रत्वंतेजःपुंजजगत्पते॥यावद्वृतंसमाप्येतत्तावत्वंसन्निधोभ
व॥आवाहनमंत्रः॥सहस्रंशीर्षापुरुषः॥श्रीरामायनमस्तुभ्यंसहस्रशिरसेन
नमः॥नमोस्तुरामचंद्रायरामभद्रायवेधसे॥पुरुषंत्वेदंआसनमंत्रः॥श्री
रामगुणरत्नाढ्यदनुजांतकरप्रभो॥कौशल्यानंदकारीत्वंरामंचंद्रनमोस्तुते॥
एतावानस्यमहिमा॥पाद्यमंत्रः॥अनंतरामदेवेशविचित्रफलदायक॥रघु

नं दनलक्ष्मीशगरुडाद्यैर्नमोऽन्तैः॥ त्रिपादूर्ध्वदैत्पुरुषः॥ अर्घ्यमंत्रः॥ गं
गाजलंसमानीतंहाटकेकलशेस्थितं॥ आचमनंकुरुरामत्वंत्रैलोक्याघविना
शकः॥ तस्माद्धिरण्यजायत॰ आचमनमंत्रः॥ मधुपर्कोमयारामदीयतेनृपसि
द्धये॥ गरुडारूढरामदेवेशपरिपूर्णायतेनमः॥ यत्पुरुषेणहविषा० मधुपर्कः॥
नारायणानमस्तेऽस्तुविश्वामित्रप्रियानघ॥ त्रैलोक्यव्यापकोरामत्राहिमांरघुनं
दन॥ तेयद्यंवर्हिषिप्रोक्षन्॰ सुद्धोदकस्नानमंत्रः॥ ॐसहस्रशीर्षापुरुषः० पद्मे
नयजुषमनंतदद्याः०॥ स्नानानंतरंआर्द्रवस्त्रमध्येपीठपूजादेवतास्थापन
॥ प्राक्द्वारेद्वारश्रियैनमः॥ धात्रेनमः॥ विधात्रेनमः॥ दक्षिणद्वारेद्वारश्रियैन
मः॥ चंडायैनमः॥ प्रचंडायैनमः॥ पश्चिमद्वारेद्वारश्रियैनमः
॥ गंगायैनमः॥ उत्तरद्वारेद्वारश्रियैनमः॥ ॐवनिधयेनमः॥ पद्मनिधयेनमः
॥ पीठमध्येआर्द्रवस्त्रोपरिमहामंडूकायनमः॥ ॐआधारशक्तयेनमः॥ कूर्मायनमः॥ ॐआनंतायनमः॥ ४॥ वराहायनमः॥ ५॥ पृथिव्यैनमः॥ ६॥ ॐ पृथिव्यैनमः
॥ ७ ॐवेदिकायैनमः॥ ८॥ ॐवास्तुपुरुषायनमः॥ ९॥ क्षीरार्णवायनमः॥ १० क्षीरार्णव
मध्येश्वेतद्वीपायनमः॥ ११॥ श्वेतद्वीपमध्येकल्पवृक्षायनमः॥ १२॥ कल्पवृक्षस्या
धस्तात्स्वर्णवेदिकायैनमः॥ १३॥ सुवर्णवेदिकामध्येदिव्यसिंहासनायनमः॥
१४॥ दिव्यसिंहासनप्रस्तारिपादादिदिक्षुआग्नेयकोणेआरंभः॥ ॐधर्मायनमः
॥ १॥ अधर्मायनमः २ ॐज्ञानायनमः ३ ॐअज्ञानायनमः॥ ४ ॐवैराग्यायनमः ५
ॐअवैराग्यायनमः॥ ६ ऐश्वर्यायनमः ७ अनैश्वर्यायनमः ८ अष्टदलमध्ये॥
सत्वायनमः १ रजसेनमः २ तमसेनमः ३ ॐआंअंतरात्मनेनमः ४ परमात्मने
५ मामात्मनेत्वायनमः ६ ॐविद्यात्मनेत्वाय०॥ ७॥ ॐ करौलात्मनेत्वायनमः॥ ८ ॐम्
लनत्वायनमः ९ ॐ नारायनमः॥ १० ॐ स्वंकायनमः ११ ॐ पद्मपत्रेभ्योनमः॥
१२ विजकेसरेभ्योनमः १३ ॐसूर्यमंडलायनमः १४ ॐ सूर्यमंडलाधिपतये

नमः १५ सोमसंऽलायनमः १६ सोमसंऽलाधिपतयेविष्णवेनमः १७ ॐ अग्निसं
ऽलायनमः १८ ॐ अग्निसंऽलाधिपतयेश्रीमहारुद्रायनमः १९ प्रभासंऽलायनमः
२० प्रकृतिपुरुषायनमः १ अष्टदलपद्मप्राग्दिदिक्षु ॥ पूर्वविमलायनमः । दक्षिणा
नः उत्कर्षायेनमः । २ प्रतीच्यैनानायेनमः ३ उदीच्यैज्ञानायेनमः ॥ श्रीरामायसकल
परिवारशक्तियुक्तायमध्येयोगपीठायनमः ॥ त्रैलोक्यंतसर्वलोकंनरस्थं ॥ ॐका
रास्त्यंयोगिनीध्यानगम्यंसंगंशक्तिंसायुधंभक्तमेघंसवीकारंरामभावाहया
मि ॥ पीठमध्येसीतासहितरामप्रतिमाप्रतिष्ठाप्य ॥ सुप्रतिष्ठितोभवासुप्रसन्नो
भवासुवरदोभव ॥ आगच्छभगवन्रामस्थानेचात्रस्थिरोभव ॥ कुरुत्वंसु
संपूर्णांप्रसन्नावरदारामम ॥ ध्यायेद्रामंजगन्नाथमानंदज्ञानदर्पणं ॥ परमा
त्मावरंब्रह्मपरमेश्वरनमोस्तुते ॥ श्रीरामवरुरूपायरघुनंदनराघव ॥ नमोमाहा
त्म्यदेवायश्रीरामायनमोनमः ॥ तस्माद्यज्ञात्सर्वहुतः संभृ० वस्त्रमंत्रैः ॥

राम० ३

श्रीरामवैजैत्रमनसस्त्रमंत्राहिमांभवसागरात् ॥ यस्तसूत्रंसोत्तरीयंगृहाण
रघुनंदन ॥ तस्मायज्ञात्सर्वहुतः० ॥ यज्ञोपवीतमंत्रः ॥ श्रीखंडंचंदनंरामनाना
गंधसमन्वितं ॥ अनेकपरिमलाढ्यंचचंदनंप्रतिगृह्यतां ॥ तस्माद्यज्ञात्सर्वहु
तः । चंदनमंत्रः ॥ शालीनांतंडुलादिभ्यः कुंकुमेनविराजिताः ॥ गृह्यतांरामदेव
शसीतयासहितोनघ ॥ यत्पुरुषंव्यदधुः । अक्षतामंत्रः ॥ माल्यादीनिसुगंधी
निमालत्यादीनिवैप्रभो ॥ प्रयाहतानिपूजार्थंपुष्पाणिप्रतिगृह्यतां ॥ शाल
ग्रामस्यमुखमासीत् ० पुष्पमंत्रः ॥ वनस्पत्यूद्भवोदिव्योगंधाढ्योगंधउत्तमः ॥
आघ्रेयःसर्वदेवानांश्रीरामप्रतिगृह्यतां ॥ धूपमंत्रः ॥ चंद्रादित्यौचधरणी
विपुरग्निस्तथैवच ॥ त्वमेवसर्वज्योतींषिआर्त्तिक्यंप्रतिगृह्यतां ॥ दीपमंत्रः ॥
नानापक्वान्नसंयुक्तंनानाभक्ष्यसमन्वितं ॥ परमान्नंशर्करायुक्तंप्रीत्यर्थंनव
राघव ॥ नैवेद्यमंत्रः ॥ मध्येपानीयंसमर्पयामि ॥ उत्तरापोशनंसमर्पयामि

॥हस्तप्रक्षालनंसमर्पयामि॥मुखप्रक्षालनीयंसमर्पयामि॥पादप्रक्षालनंसमर्पयामि॥आचमनीयंचरनंमलयजंश्रीखंडकस्तूरीकेसरैर्युतं॥करोद्वर्तनकंरामप्रीत्यर्थंप्रतिगृह्यतां॥करोद्वर्तनंसमर्पयामि॥नारिकेलंचकूष्मांडंमातुलिंगंतथैवच॥फलानिवेदितेनुभ्यंप्रीत्यर्थंप्रतिगृह्यतां॥इदंफलंमयादेव०फलमंत्रः॥पुंगीफलंमहद्दिव्यं नागवल्लीदलैर्युतं॥कर्पूरैलासमायुक्तंतांबूलंप्रतिगृह्यतां॥तांबूलमंत्रः॥हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॥अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥हिरण्यगर्भःसमवर्त्तताग्रे॥हिरण्यंसमर्पयामि॥नीराजनं॥पुष्पांजलिंसमर्पयामि॥कौशल्यारामंमाताचपितादेवीसागरीयसी॥अतस्त्वांपूजयिष्यामिरामंमातर्नमोस्तुते॥कौशल्यापूजनं॥जानक्यैनमः॥सीतायैनमः॥लक्ष्मणायनमः॥भरतायनमः॥शत्रुघ्नायनमः॥हनुमतेनमः॥नमस्कारमंत्रः॥मंथानके

॥इक्ष्वाकुवंशतिलकंप्रीतोभवभवप्रिय॥अघक्ष्यंकुरुनिवेदनं॥उपोष्यनवमींत्वद्यामेघघराघव॥तेनप्रीतोभवत्वंहिसंसाराच्चाहिमांहरे॥उपोषणनिवेदनमंत्रः॥अस्यारामनवमींचरामाराधनतत्परः॥उपोष्यषष्ठ्यामेषुपूजयित्वायथाविधिः॥इमांस्वर्णमयीरामप्रतीमास्वप्रयत्नतः॥श्रीरामप्रीतयेदास्येरामभक्तायधीयते॥श्रीरामप्रतिमादानंकरिष्येहंद्विजोत्तम॥नरकोत्तारणार्थायपुनर्जन्मोनविद्यते॥शतपत्रंजातिपुष्पंतुलसीचूतपुष्पकं॥त्रिभुनापूरयेशंखंगंधाक्षतसदक्षिणं॥दशाननवधाद्धीयभूभारोत्तारणायच॥राक्षसानांविनाशायभक्तानांपालनायच॥परित्राणायसाध्वनांजातोरामस्वयंहरिः॥गृहाणार्घ्यमयादत्तंकौशल्यासहराघव॥परित्राणायसाध्वनांजातोरामस्वयंहरिः॥गृहाणार्घ्यमयादत्तंभ्रातृभिःसहितोनघ॥इदमर्घ्यंसमर्पयामि॥नक्षत्रेशमहातेजरामचंद्रमनोरम॥गृहाणार्घ्यमयादत्तंब्रह्मादिदेवतैःसह॥इदमर्घ्य०॥धनंदेहियशोदेहिकीर्तिमायुःसुखंबलं॥श्री

रामप्रीतयेदास्यतुष्टोभवनुराघव॥नवप्रसादाद्देवेशकृतंयत्यारणांमया॥व्रतेनानेनसंतुष्टस्वामिन्भुक्तिप्रयच्छमे॥पारणानिवेदनमंत्रः॥श्रीरामकामान्मेदेहिसर्वकामफलप्रद॥लक्ष्मीशरामरूपेणपुत्रपौत्रप्रवर्धनं॥नमस्कारमंत्रः॥ ॥इतिरामपूजाविधिःसमाप्तिमगमत्॥ ॥अथकथा॥ ॥श्रीरामायनमः॥अगस्त्यउवाच॥रहस्यंकथयिष्यामिसुतीक्ष्णामनुमत्तम॥चैत्रमासेनवम्यांचशुक्लपक्षेरघुत्तम॥१॥प्राकुरासीत्ततोब्रह्मन्परब्रह्मैककेवलं॥तत्रजागरणंकुर्यात्तुरामस्यपुरतोभुवि॥२॥प्रतियामंयथाशक्तिपूजांकुर्यादयाविधिः॥प्रातर्दशम्यांस्नात्वाचकृत्वाचआह्निकाक्रियां॥संपूज्यविधिवद्रामंभक्त्यावित्तानुसारतः॥ब्राह्मणान्भोजयेद्भक्त्यादक्षिणाभिश्चतोषयेत्॥गोभूतिलहिरण्यैर्वस्त्रालंकारणास्तथा॥रामभक्तांचयत्नेनप्रीणयेत्परयामुदा॥एवंयःकुरुतेभक्त्याश्रीरामनवमीव्रतं॥अनेकजन्मजातानिपापानिचमहान्त्यपि॥६॥भस्मीकृत्यव्रजन

त्येवतद्विष्णोःपरमंपदं॥सर्वेषामप्यमंधर्मोभुक्तिमुक्तेयेकसाधनं॥७॥अस्मिन्दिवीपिपापिष्ठःकृत्वैतद्व्रतमुत्तमं॥एतस्मात्सर्वभूतानांयथारामस्तथेवसः॥८॥यस्तुरामनवम्यांतुभुक्तेसंतुनरोत्तमः॥कुंभीपाकेषुघोरेषुपच्यतेनात्रसंशयः॥९॥अकृत्वारामनवमीव्रतंसर्वोत्तमुत्तमं॥व्रतान्यन्यानिकुरुतेनतेषांफलभाग्भवेत्॥१०॥महांत्यपिप्रनश्यंतिपापानिनचमीव्रतात्॥एकामपितिथौतस्मात्श्रीरामनवमींमुने॥११॥उपोष्यकृतकृत्यस्यात्सर्वपापैःप्रमुच्यते॥श्रीरामनवम्यांतुश्रीरामप्रतिमाव्रतः॥१२॥विधानेनमुनिश्रेष्ठसमुक्तोनात्रसंशयः॥सुतीक्ष्णउवाच॥श्रीरामप्रतिमादानंविधानंवाकथंमुने॥यथायस्तुयथारामभक्तस्यमर्मविस्तरात्॥१३॥अगस्त्यउवाच॥कथयिष्यामितेभक्त्याप्रतिमादानमुत्तमं॥विधानंचापियत्नेनपतस्वैकाग्र्यतोत्तमं॥२॥अष्टम्यांचैत्रमासेतुशुक्लपक्षेजितेंद्रियः॥इंद्रियाणांनिरोधेनप्रातःस्नात्वायथाविधि॥३॥नद्यांतडागेकू

पेवावाप्यप्रस्रवणेपिवा॥संध्यादिकाःक्रियाःकुर्यात्संस्मरन्राघवंहृदि॥४॥गृह
मासाद्यविप्रैरुकुर्यादेवपासनादिकं॥दांतंकुटुंबिनंविप्रंवेदशास्त्रतंसदा॥५॥श्री
रामपूजानिरतंसुशीलंदंभवर्जितं॥सर्वत्ररामंत्रापाणंरामंत्रैकसाधनं॥६॥श्रा
हूयभक्त्यासंपूज्यवस्त्रयात्रन्नमौनिनि॥श्रीरामप्रतिमादानंकरिष्येहंद्विजोत्तम॥
७॥तत्राचार्योभवोप्रातःश्रीरामोपित्वमेवमे॥इत्युक्त्वाचक्षमायांतंस्नापयित्वा
ततःस्वयं॥८॥तंदेवाभ्यर्चनःस्नात्वाचिंतयन्राघवंहृदि॥श्वेतांबरधरंविप्रं
धमाल्यादिरापयेत्॥९॥अर्चितोभूषितश्चैलत्वाप्रध्यान्किकाःक्रियाः॥क्रिया
चार्यभोजनेत्रश्चात्सात्विकान्नैःसुविस्तरं॥१०॥मुंजीयास्त्वत्प्रसाद्यंवहृदिराम
मनुस्मरन्॥एकभक्तंव्रतीतत्रसदाचार्योजितेंद्रियः॥११॥श्रावन्रामकथां
दिवांदिवाप्रेषंनयेन्मुने॥सायंकालक्रियाःकार्याःश्रीरामंमनसास्मरन्॥१२॥ राम०
आचार्यसहितोरात्रौगुरुकार्योजितेंद्रियः॥शयीतभूतलेतस्मिंश्रीरामार्पितमा ६

नसः॥१३॥ततःप्रातःसमुत्थायकृत्वासंध्याविधानतः॥प्रातःकर्मणिसर्वाणि
श्रीघ्रमेवसमर्पयेत्॥१४॥ततःस्वस्थमनाभूत्वाविद्वद्भिःसहितोनघ॥स्वगृहे
चोत्तरेभागेदानमेडलमुज्वलं॥१५॥चतुर्द्वारपताकाढ्यंसवितानंसतोरणं॥म
नोरमंमनोत्साहंपुष्पाद्यैःसमलंकृतं॥१६॥शंखचक्रहरूमद्भिःप्राक्द्वारसमा
लंकृतं॥गरुत्मच्छादःपार्श्वोचदक्षिणोसृधिभृ॥१७॥गदाखड्गादैश्चैवपश्चिमेच
विभूषितं॥पद्मस्वस्तिकनीलोत्पकोबेरसमलंकृतं॥१८॥मध्येहस्तचतुष्काघ
दिकामुक्तमासनं॥प्रविश्यनत्यगीतैश्चवाद्यैश्चापिसमन्वितः॥१९॥पुराणाह
वाचयेत्तत्रविद्वद्भिःप्रीतमानसैः॥ततःसंकल्पयेद्वैरामंमेवममुस्मरन्॥२०॥
अस्मिंरामनवम्यांतुरामाराधनतत्परः॥उपोष्यषष्ठ्यामेषूद्यन्नभित्वामध्यावि
धिः॥२१॥हेमांस्वर्णमयीरामप्रतिमांतुप्रयत्नतः॥श्रीरामप्रीतयेदास्येरामम
न्त्रकामधीमते॥२२॥प्रीतोरामाहरत्माभूपापानिसुबहून्यपि॥अनेकसङ्गानिश्च

म्यस्तानि महांति च ॥२३॥ ततः स्वर्णमयीं रामप्रतिमां लक्षमानतः ॥ निर्मितां द्विभुजां
सौम्यां रामांकस्थितजानकीं ॥२४॥ विभ्रतीं दक्षिणे पार्श्वे ज्ञानमुद्रां महामुने ॥ वामेना
पि करेणैव वधादिमार्गसूचिकां ॥२५॥ सिंहासनेराजतेच पद्मद्वयविनिर्मिते ॥ पंचा
मृतेनस्नानेनसंपूज्यविधिवत्ततः ॥२६॥ मूलमंत्रेणनियतो न्यासपूर्वमतंद्रितः
॥ दिव्यैर्विधिवदुत्थाय त्रोनागरगानथा ॥२७॥ दिव्यंरामकथांश्रुत्वनरोरामं भजन्
समन्वितः ॥ नृत्यगीतादिभिश्चैवरामस्तोत्रैरनेकधा ॥२८॥ याष्टकंपूजनंकृत्वा
गंधपुष्पाक्षतैः सह ॥ कर्पूरागरुकस्तूरीनानागंधसमन्वितं ॥२९॥ पूजयेद्विधि
वद्भक्त्यादिवारात्रौ प्रयत्नतः ॥ तत्र प्रभातसमयेस्नानसंध्यादिकाःक्रियाः ॥३०॥
समाप्यविधिवद्रामंपूजयेद्विधिवत्क्रमात् ॥ ततोहोमंप्रकुर्वीतमूलमंत्रेणमं
त्रवित् ॥३१॥ पूर्वोक्तपद्मकुंडेवास्थंडिलेवासमाहितः ॥ लौकिकाग्नौविधानेनश
तमष्टोत्तरंशतं ॥३२॥ तिलाज्यपायसंचैवस्मरन्रामंमतींद्रितः ॥ ततोभक्तस्तु

राम० ७

सेनुर्यश्राचार्यंप्रार्थयेन्मुने ॥३३॥ कुंडलाभ्यांसुवर्णाभ्यांश्राभरणान्यनेकधा ॥ गंध
पुष्पाक्षतैर्वस्त्रैर्विचित्रैः सुमनोहरैः ॥३४॥ ततोरामंस्वमंदिरंमंत्रमुच्चारयन् ॥
इमांस्वर्णमयीरामप्रतिमांसकलांकृतां ॥३५॥ चित्रवस्त्रमुखाच्छन्नांरामोहंराघ
वायते ॥ श्रीरामप्रीतयेदास्येप्रीतोभवतुराघव ॥३६॥ इतिदत्त्वाविधानेनदद्या
द्दक्षिणांमुनेः ॥ अन्येभ्यश्चयथान्यायंगोहिरण्यंस्वशक्तितः ॥३७॥ दद्याद्दासी
मुर्वीधान्यंयथालंकरणादृतः ॥ ब्राह्मणोःसहभुंजीततेभ्योदद्यात्सदक्षिणां ॥३८॥
एवंयःकुरुतेरामप्रतिमादानमुत्तमं ॥ ब्रह्महत्यादिपापेभ्योमुच्यतेनात्रसंशयः
॥३९॥ तुलापुरुषदानेनफलंप्राप्नोतिसुव्रतं ॥ अनेकजन्मसिध्येतपापेभ्योमु
च्यतेध्रुवं ॥४०॥ बहुनाकिमिहोक्तेनमुक्तिस्तस्यकरेस्थितः ॥ कुरुक्षेत्रेमहापु
ण्येसूर्यपर्वण्यनेकशः ॥४१॥ सूतीक्ष्णउवाच ॥ प्रायेणाहिनराःसर्वेदरिद्राःक्ष
णामुने ॥ अशक्तेस्तुमहाभागद्रव्यशक्त्यनुसारतः ॥ पलार्धेनतदर्धेनयथा

वितानुसारतः॥४३॥वितथाचमकर्त्तव्यंकुर्याद्देवव्रतंमुने॥यदिघोरतरां
दुष्टंयातनानेहतेक्वचित्॥४४॥निष्किंचनोपियत्नेनउपोष्यनवमीदि
ने॥कृत्वाजागरणंभक्त्याभुंजीयाद्विधिवन्मुने॥४५॥जपेन्नामत्रयंहृन्
मंत्रंराघवंबुधसंयुतं॥एकांतचित्तोविधिवत्सर्वपापहरोभवेत्
॥४६॥गोभूतिलाहिरण्यादिदद्याद्वित्तानुसारतः॥श्रीरामतोषणा
र्थंचश्राद्धार्थीयतिवेदयेत्॥४७॥यत्किंचिद्रामनुद्दिश्यनदद्यात्ति
लशक्तितः॥रौरवेषुक्रमात्तेचघोरेषुपच्यतेनात्रसंशयः॥४८॥सुती
क्ष्णउवाच॥यामाद्यकेषुपूजावैतथाप्रोक्तामहामुने॥कृत्स्नमंत्रे रा.म.
णतेषुक्रंतत्कथंचदस्तुव्रतं॥४९॥अगस्त्यउवाच॥सर्वेषांराममंत्रा ८
णांमंत्रराजषडक्षरः॥तारकंध्रुवमुक्तंतेनैनपूजाप्रशस्यते॥५०॥श्रा

दौएवंप्रकुर्वीतदेवस्यप्रतिमार्चनः॥उपचारैःषोडशभिःपूजाकार्याय
थाविधिः॥५१॥आवाहनंस्नपनंस्नानंसंनिधापनमेवच॥संनिरोधन
मेवस्याद्वगुंठनमेवच॥५२॥तन्मुद्राचामिमेवास्याद्देवसंपूजयत्नतः
॥शंखपूजांप्रकुर्वीतपूर्वोक्तविधिनामुने॥५३॥कलशंवामभागंचय
जाद्व्याणिचादरात्॥पीठंसंपूज्ययत्नेनआत्मनामंत्रमुच्चरन्॥५४॥
प्रतिमामंशंखपूजांकुरुदेवमनुस्मरन्॥पात्रासादनमध्येवंकुर्यात्साम.
मनन्वितः॥५५॥एवंसोपस्करंदेवमुपचारैस्तुषोडशैः॥अर्चयेद्रामच
ंद्रंचसर्वपापैःप्रमुच्यते॥५६॥जन्मकोटिकृतैर्घोरैर्नानारूपैश्चदारु
णैः॥विमुक्तस्तत्क्षणाद्देवरामएवभवेन्मुने॥५७॥लोहेननिर्मितोचा
पिशीलघोरारुणा॥येनकेनप्रकारेणायस्मैकस्मैयवामुने॥५८॥कृ
तंसर्वप्रयत्नेनयत्किंचिदपिभोक्तृतः॥नवेदकांतमासीनोयावत्स्याद्दृश

मीदिनं॥ ५२॥ अनेनस्यात्परश्चरणादशम्यांभोजयेद्विज्ञान्॥ कृतकृत्योभ
वेत्तेनसयोरामप्रसीदति॥ ६०॥ तुष्टोनिहन्तरोगानि पुनरावर्त्तिवर्जि
तं॥ द्वादशाब्दकृतेनापियत्पापेनापनुद्यते॥ ६१॥ विलयंयातितत्सर्वं श्री
रामनवमीदिने॥ जपेनराममंत्रेणापोषंतोनातिनन्दवै श्रीतस्पवै॥ ६२॥
उपोष्यसंस्मरंन्नामंन्यासपूर्वमनन्यधा॥ गुरुणाव्रतमंत्रस्तुतस्पन्यास
पुरःसरं॥ ६३॥ यामेयामेचविधिना कुर्वन्स्नानसमाहितः॥ समुद्धरेत्पितॄ
सदाश्रीरामनवमीव्रतो॥ ६४॥ हेमभारसहस्रंतु करुक्षेत्रेरविग्रहे॥ उपो
ष्यजन्मनियेनीरामस्तूर्यपर्वशतानिच॥ ६५॥ एवंयः कुरुतेभक्त्याविष्णुसायु
ज्यमाप्नुयात्॥ सप्तजन्मकृतंपापंलघ्वंयातिनसंशयः॥ ॐ॥ इतिश्रीभविष्यो राम०
त्तरपुराणेरामनवमीव्रतंसंपूर्णं॥ ॐ॥ ॐ ॥श्रीरामचंद्रायनमः॥ २

LIBRARY UNIVERSITY PENNSYLVANIA